## ११ – चुरादिगणे विशेषधातवः

चुरादिगणे सामान्यकार्यं त्रिभिः सूत्रैः क्रियते इति अस्माभिः दृष्टम् | तानि च **अचो ञ्णिति, अत उपधायाः, पुगन्तलघूपधस्य च** | इदं कार्यं सामान्यम् इत्युच्यते अस्मिन् गणे | पुनः चुरादिगणे बहवः हलन्तधातवः सन्ति यत्र किमपि कार्यं नार्हति यतः उपधायां ह्रस्व–अकारः (अत्) अपि नास्ति, लघु इक् अपि नास्ति | तान् अपि वयम् अपश्याम | अस्मिन् करपत्रे ये चुरादिगणीयाः धातवः विशेषाः सन्ति, तान् अवलोकयाम |

१. अदन्तधातवः (93 धातवः)

चुरादिगणे त्रिनवतिः धातवः अदन्ताः सन्ति | यथा कथ, गृह, गण, क्षिप— एषाम् अन्ते ह्रस्व–अकारः वर्तते | तस्य अकारस्य लोपः तु भवति, परन्तु **उपदेशेऽजनुनासिक इत्** इति सूत्रेण इति न | यतोहि एषु धातुषु स च अन्त्यः अकारः अनुनासिकः (अँ) नास्त्येव; अतः इमे अकाराः इत्–संज्ञकवर्णाः न सन्ति | तर्हि एषां धातूनाम् अन्त्यः अकारः कथं लुप्यते ? चुरादिगणे धातुभ्यः णिच्–प्रत्ययः विधीयते, अतः एकं सूत्रम् अस्ति **अतो लोपः**, यस्य द्वारा अकार–लोपः सिध्यति—

**अतो लोपः** (६.४.४८) = अदन्ताङ्गस्य ह्रस्व–अकारलोपो भवति आर्धधातुके प्रत्यये परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन **अतः अङ्गस्य** नाम न केवलम् ह्रस्व–अकारः इत्यङ्गस्य, अपि तु ह्रस्व–अकारान्तस्य अङ्गस्य | **अलोऽन्तस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव लोपः (न तु अङ्गस्य) | **उपदेशे** अनुवर्तते अतः प्रसक्तिः केवलम् उपदेशावस्थायाम्* | अतः षष्ठ्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **अनुदात्तोपदेश–वनति–तनोत्यादीना–मनुनासिकलोपो झलि क्ङिति** (६.४.३७) इत्यस्मात् **उपदेशे** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१), **आर्धधातुके** (६.४.४६) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अतः अङ्गस्य लोपः आर्धधातुके उपदेशे** |

णिच्–प्रत्ययः आर्धधातुकः अस्ति अतः धातुः अदन्तः चेत्, **अतो लोपः** (६.४.४८) इत्यस्य प्रसक्तिः भवति |

यथा—

कथ + णिच् → कथ्
गृह + णिच् → गृह्

इदानीं कथ् इति धातुः अस्ति, गृह् इति धातुः अस्ति | अस्यां दशायां कथ्–धातोः उपधायाम् अत् (ह्रस्व–अकारः) इत्यस्य वृद्धिः, अपि च गृह्–धातोः उपधायां लघु–इकः गुणः |

**अत उपधायाः** (७.२.११६) = उपधायाम् अतः वृद्धिः ञिति णिति प्रत्यये परे | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य उपधायाः अतः वृद्धिः ञ्णिति** |

**पुगन्तलघूपधस्य च** (७.३.८६) = पुगन्तस्य अङ्गस्य लघूपधस्य च इकः गुणो भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | अनुवृत्ति–

सहितसूत्रम्— **पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** |

अनयोः सूत्रयोः प्रसक्तिः स्यात् | परन्तु अनेन परिभाषा–सूत्रेण लोपः लुप्त–अकारः इव भवति—

**अचः परस्मिन् पूर्वविधौ** (१.१.५७) = परनिमित्तकः अजादेशः स्थानिवत् भवति, पूर्वविधौ कर्तव्ये | अचः स्थाने यः आदेशः सः अजादेशः | यस्य स्थाने आदेशः विधीयते सः स्थानी | 'अजादेशः स्थानिवत्' नाम यः आदेशः अचः स्थाने विहितः, सः पुनः मूलः अच् इव— 'स्थानिवत्' भवति | पूर्वविधौ नाम सा स्थितिः यदा स्थानिनः अचः पूर्वस्थितस्य कार्यं विधीयते | परस्मिन् इति निमित्तसप्तमी | पूर्वविधौ इति विषयसप्तमी | पूर्वस्य विधिः पूर्वविधिः षष्ठीतत्पुरुषः, तस्मिन् पूर्वविधौ | अचः षष्ठ्यन्तं, परस्मिन् सप्तम्यन्तं, पूर्वविधौ सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **स्थानिवदादेशोऽनल्विधौ** (१.१.५६) इत्यस्मात् **स्थानिवत्, आदेशः** इत्यनयोः अनुवृत्तिः | अनुवृत्ति–सहितसूर्त्रम्— **अचः आदेशः स्थानिवत् परस्मिन् पूर्वविधौ** |

इत्थं च चुरादिगणे अदन्तधातुभ्यः णिच्–प्रत्ययः विधीयते, अतः लोपः स्थानिवत् नाम ह्रस्व–अकारः इव | अनेन कारणेन **अत उपधायाः** इति सूत्रस्य दृष्ट्या कथ्–धातुः 'कथ' इतिवत् दृश्यते | तस्मात् उपधायां थकारः प्रतीयते न तु ह्रस्व–अकारः | अस्यां दशायां किमपि कार्यं न सम्भवति | यथा—

कथ + णिच् → **अतो लोपः** → कथ् + णिच् → **अत उपधायाः** इत्यनेन स्थितस्य अतः वृद्धिः भवति स्म → **अचः परस्मिन् पूर्वविधौ** → कथ् धातोः अन्त्यः लोपः अत् इव दृश्यते → **अत उपधायाः** इति सूत्रेण "कथ" दृश्यते इति कारणतः उपधायाम् अधुना थकारः वर्तते → अतः वृद्धिः न भवति |

चुरादिगणे अदन्तेषु धातुषु एतादृशी गतिः सर्वत्र—

कथ् + णिच् → कथि + शप् → कथयति/ते
गण् + णिच् → गणि + शप् → गणयति/ते
क्षिप् + णिच् → क्षिपि + शप् → क्षिपयति/ते
पुट् + णिच् → पुटि + शप् → पुटयति/ते
गृह् + णिच् → गृहि + शप् → गृहयति/ते

प्रश्नः उदेति यदि कथ इति धातोः उपदेशावस्थायां धात्वन्ते स्थितः अत् अनुनासिको न, तर्हि किमर्थं **अतो लोपः** (६.४.४८) इत्यस्य स्थाने **अचो ञ्णिति** (७.२.११५) इत्यनेन अतः वृद्धिः न स्यात् ? द्वयोः सूत्रयोः अन्यत्रलब्धावकाशः अस्ति, अपि च **अचो ञ्णिति** (७.२.११५) इति परसूत्रम् | **अतो लोपः** (६.४.४८) इत्यस्य निमित्तम् 'आर्धधातुके परे', अतः यावन्तः आर्धधातुकप्रत्ययाः सन्ति ते च पराः चेत्, **अतो लोपः** (६.४.४८) इत्यस्य अवकाशः | अतः **अचो ञ्णिति** (७.२.११५) इत्यस्य परत्वात् वृद्धिः भवेत् |

प्रत्युत्तरम् एवं यत् '**आर्धधातुके**' इत्यनेन विषयसप्तमी मन्यते चेत्, **अतो लोपः** (६.४.४८) इत्यस्य कार्यं भविष्यति; '**आर्धधातुके**' इत्यनेन परसप्तमी मन्यते चेत्, परत्वात् **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः | विषयसप्तमी नाम यदा हि विचारः आयाति यत् आर्धधातुकप्रत्ययः आगमिष्यति, तदा हि तेन निर्दिष्टं कार्यं सिध्यति— आर्धधातुकप्रत्ययस्य आगमनात् प्रागेव | '**आर्धधातुके**' इति यदा

विषयः उदेति यत् आर्धधातुकप्रत्ययः आगम्यमानः— तावता प्रत्ययः शारीरिकरूपेण पुरतः नास्ति, केवलम् आगम्यमानः— तदानीम् **अतो लोपः** (६.४.४८) इत्यनेन अतः लोपो भवति | **अचो ञ्णिति** (७.२.११५) इत्यस्मिन् परसप्तमी अतः ञित् णित् प्रत्ययः शारीरिकरूपेण पुरतः स्थितः चेदेव कार्यं सेत्स्यति | अत्र बहुसंख्यता विषयसप्तमीं मन्यते; अस्मिन् पक्षे कथयति इति रूपम् | परन्तु केचन परिगणिताः वदन्ति यत् अत्र परसप्तमी स्यात्; तेषां मतेन कथायति इति रूपम् |

*__अतो लोपः__ (६.४.४८) इति सूत्रे प्रश्नः उदेति किमर्थम् **उपदेशे** इत्युक्तम् | उत्तरम् एवं यत् अनुवृत्तौ **उपदेशे** इति यदि नाभविष्यत्, तर्हि कासुचित् स्थितिषु (अनुपदेशावस्थायाम्) इष्टं रूपं न प्राप्स्यत् | यथा— भ्वादिगणे अय् गतौ इति धातुः; उदाहरणार्थं कश्चन आर्धधातुक–प्रत्ययः अस्ति क्विप् |

अय् + क्विप् → अनुबन्धलोपे → अय् + व् → **लोपो व्योर्वलि** (६.१.६५) इत्यनेन यकार–लोपः → अ + व् → **अतो लोपः** (६.४.४८) इत्यनेन अ–लोपः, **वेरपृक्तस्य** (६.१.६६) इत्यनेन व्–लोपः → शून्यम् अवशिष्यते |

अतः **उपदेशे** नास्ति चेत् इष्टं रूपं न प्राप्यते | **उपदेशे** अस्ति चेत् अ–लोपः न भवति यतोहि 'अ' इति उपदेश–अवस्थायां नास्ति |

अ + व् → **ह्रस्वस्य पिति कृति तुक्** (६.१.७०) इत्यनेन तुक्–आगमः → अत् + व् → **वेरपृक्तस्य** (६.१.६६) इत्यनेन व्–लोपः → अत् इति इष्टं रूपं प्राप्तम् |

२. कृप्–धातोः विधिः

कृपेश्च अवकल्कने (विचारं करोति, चिन्तनं करोति) |

**कृपो रो लः** (८.२.१८) = कृप्–धातोः रेफस्य लकारादेशो भवति | र इति श्रुतिसामान्यं बोध्यम् | तेन यः केवलो रेफः, यश्च ऋकारस्थः तयोः द्वयोः अपि ग्रहणम् | लः इत्यपि श्रुतिसामान्यमेव | अतः आहत्य कृप्–धातोः यदा (गुणादेशं कृत्वा) रेफो भवति, तस्य रेफस्य स्थाने लकारादेशः; पुनः कृप्–धातोः ऋकारस्य यः रेफ–सदृश–अंशः, तस्य स्थाने लसदृश–अंशादेशो भवति— नाम ऋ–स्थाने ऌ | सूत्रे **कृपो** → कृप + उः इति विच्छेदः | कृप लुप्तषष्ठीकं पदम्, उः षष्ठ्यन्तं, रः षष्ठ्यन्तं, लः प्रथमान्तं, अनेकपदमिदं सूत्रम् | कृपः इत्यस्य द्विवारम् आवृत्तिः | सूत्रं स्वयं सम्पूर्णम्— **कृपः उः कृपः रः लः** |

यत्र कृप्–धातोः उपधायाः गुणः भवति कर्प्, तत्र रेफस्य स्थाने लकारादेशः अतः कल्प् इति फलम्; यत्र उपधागुणो न भवति, तत्र कृप् इत्यस्य ऋकारस्य स्थाने ऌकारदेशः अतः कॢप् इति फलम् |

लटि कल्पयति/ते | कृप् + णिच् → **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधायां लघु–इकः गुणः → कर्प् + इ → **कृपो रो लः** (८.२.१८) इत्यनेन रेफस्य स्थाने लकारादेशः → कल्प् + इ → कल्पि इति धातुः → कल्पि + शप् → कल्पय इति अङ्गम् → कल्पय + ति → कल्पयति/ते

लिट्–लकारे गुणनिषेधत्वात् ऋकारस्य उदाहरणम्—

लिटि चक्लृपे | कृप् + ए → द्वित्वम् अभ्यासकार्यम् च → चकृप् + ए → **कृपो रो लः** (८.२.१८) इत्यनेन ऋकारस्य स्थाने लृकारादेशः → चक्लृप् + ए → चक्लृपे

प्रश्नः उदेति यदि रेफस्य स्थाने लकारस्तु भवति एव, तर्हि किमर्थं मूलधातौ उपदेशावस्थायां क्लृप् न स्यात् ? उतरम् अस्ति यत् वेदे तस्य ऋकारस्य महत्त्वं वर्तते | वेदे उच्चारणार्थं प्रत्येकं स्वरस्य विशिष्टम् इङ्गितम् | अतः वेदे अयं धातुः ऋदुपदधातुः भवेत् |

३. <u>कॄत्–धातोः विधिः</u>

कॄत संशब्दने = प्रसिद्धं करोति, उद्घोषणं करोति, गुणं प्रसारयति |

**उपधायाश्च** (७.१.१०१) = धातोरुपधाभूतस्य ॠतः इत्स्यात् | धातोः उपधायां स्थितस्य दीर्घ–ॠकारस्य स्थाने ह्रस्व–इकारादेशो भवति | उपधायाः षष्ठ्यन्तं, चाव्ययं, द्विपदमिदं सूत्रम् | **ॠत इद्धातोः** (७.१.१००) इत्यस्य सूत्रस्य पूर्णतया अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ॠतः धातोः अङ्गस्य इत् उपधायाश्च** |

अनेन कॄत् धातोः ॠकारस्य ह्रस्व–इकारादेशः भवति |

स्मारणार्थं यत्र धातुः ॠकारान्तः, तत्र **ॠत इद् धातोः** (७.१.१००) इत्यनेन ॠकारस्य स्थाने इकारादेश | यथा तुदादिगणे अस्माभिः दृष्टम्— कॄ–धातोः ॠकारः → इ आदेशः, कॄ → कि → **उरण् रपरः** इत्यनेन रपरः → किर् → किर् + अ + ति → किरति |

**ॠत इद् धातोः** (७.१.१००) = ॠदन्तस्य धातोः अङ्गस्य ह्रस्व–इकारादेशो भवति (किति ङिति प्रत्यये परे) | कित्–ङित् भिन्नप्रत्ययः परे चेत्, गुणे सति इकारादेशस्य प्रसक्तिर्न भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य ॠकारस्य स्थाने ह्रस्व–इकारादेशः | ॠतः षष्ठ्यन्तम्, इत् प्रथमान्तम्, धातोः षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन **ॠतः** इत्यनेन ॠदन्तस्य इत्यस्यापि ग्रहणम् | अनुवृत्ति–सहितसूत्रम्— **ॠतः धातोः अङ्गस्य इत्** |

चुरादिगणे कॄत्–धातुः—

| | |
|---|---|
| कॄत् → कित् | **उपधायाश्च** (७.१.१०१) |
| कित् → किर्त् | **उरण रपरः** (१.१.५१) |
| किर्त् → कीर्त् | **उपधायां च** (८.२.७८) |

कॄत् + णिच् → कीर्ति इति धातुः
कीर्ति + शप् → कीर्तय इति अङ्गम्
कीर्तय + ति/ते → कीर्तयति/कीर्तयते

**उरण् रपरः** (१.१.५१) = ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः भवति | ऋकारेण त्रिंशत्–प्रकारकः ऋकारः भवति इति बोध्यम् | रः परो यस्य सः रपरः | उः षष्ठ्यन्तम्, अण् प्रथमान्तम्, रपरः प्रथमान्तम्, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **उः स्थाने अण् रपरः** |

[सत्वं, नत्वं, नुमागमः] उपधादीर्घः |

**उपधायां च** (८.२.७८) = येषां धातूनाम् उपधायां रेफवकारौ हल्परौ, ताभ्यां प्राक् वर्तमानस्य इकः दीर्घादेशो भवति | हलन्तधातूनाम् उपधायां रेफः वा वकारः वा अस्ति चेत्, तयोः वर्णयोः पूर्वम् इकः दीर्घः भवति | उपधायां सप्तम्यन्तं, च अव्ययं, द्विपदमिदं सूत्रम् | **सिपि धातो रुर्वा** (८.२.७४) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः | **र्वोरुपधाया दीर्घः इकः** (८.२.७६) इत्यस्मात् **र्वोः**, **इकः**, **दीर्घः** एषाम् अनुवृत्तिः | **हलि च** (८.२.७७) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **धातोः हलि र्वोः उपधायां च, उपधायाम् इकः दीर्घः** |

कुर्द भ्वादौ = क्रीडति, नृत्यति

कुर्द → कुर्द्  **उपदेशेऽजनुनासिक इत्**
कुर्द् → कूर्द्  **उपधायां च**
कूर्द् + शप् + ते → कूर्दते

तथैव खुर्द → खूर्द्, गुर्द → गूर्द् |

४. <u>ज्ञपादयः मितः</u>

सामान्यतया **अत उपधायाः** (७.२.११६) इति सूत्रेण उपधायाम् अत् (ह्रस्व–अकारः) अस्ति चेत्, तस्य वृद्धिः भवति— अकारस्य स्थाने आकारः— ञिति णिति प्रत्यये परे | परन्तु एकः अन्तर्गणः वर्तते यस्य नाम अस्ति 'मित्' | चुरादिगणे षट् मित्–धातवः सन्ति | तेषाम् उपधायाम् **अत उपधायाः** इति सूत्रेण अतः (ह्रस्व–अकारस्य) वृद्धिः तु भवति, परन्तु पुनः **मितां ह्रस्वः** इति सूत्रेण उपधायां स्थितः आकारः ह्रस्वः भवति |

**मितां ह्रस्वः** (६.४.९२)= मित्–धातूनाम् उपधायाः स्वरः ह्रस्वः भवति, णिच्–प्रत्यये परे | मित् कश्चन अन्तर्गणः | भ्वादिगणे घटादयः उपगणः मित्–अन्तर्गणे सन्ति, अपि च चुरादिगणे ज्ञपादयः षट् धातवः मित्–अन्तर्गणे सन्ति | मितां षष्ठ्यन्तं, ह्रस्वः प्रथमान्तं, द्विपमिदं सूत्रम् | **ऊदुपधाया गोहः** (६.४.८९) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **दोशो णौ** (६.४.९०) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **मितां अङ्गानाम् उपधायाः ह्रस्वः णौ** |

**अत उपधायाः** (७.२.११६) = उपधायाम् अतः वृद्धिः ञिति णिति प्रत्यये परे | अतः षष्ठ्यन्तम्, उपधायाः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **मृजेर्वृद्धिः** (७.२.११४) इत्यस्मात् **वृद्धिः** इत्यस्य अनुवृत्तिः; **अचो ञ्णिति** (७.२.११५) इत्यस्मात् **ञ्णिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य उपधायाः अतः वृद्धिः ञ्णिति** |

ज्ञप् + णिच् → ज्ञप् + इ → **अत उपधायाः** (७.२.११६) इत्यनेन उपधायाम् अतः वृद्धिः णिति प्रत्यये परे→ ज्ञापि → **मितां ह्रस्वः** (६.४.९२) इत्यनेन उपधायाः स्वरः ह्रस्वः णिचि → ज्ञपि इति धातुः → ज्ञपि + शप् → ज्ञपय इति अङ्गम् → ज्ञपय + ति → ज्ञपयति/ते

षट् धातवः— ज्ञप, यम, चह, रह, बल, चिञ्

ज्ञप ज्ञानज्ञापन–मारणतोषणे = सूचयति, जयति, मारयति, प्रसन्नः भवति
यम परिवेषणे = नियमयति, नियन्त्रणं करोति
चह परिकल्कने = वञ्चयति
रह त्यागे = त्यजति, जहाति
बल प्राणने = जीवति; पोषणं करोति
चिञ् चयने = सङ्ग्रहणं करोति

ज्ञप → ज्ञप् + इ → ज्ञापि → ज्ञपि → ज्ञपय → ज्ञपयति/ते
यम → यम् + इ → यामि → यमि → यमय → यमयति/ते
चह → चह् + इ → चाहि → चहि → चहय → चहयति/ते
रह → रह् + इ → राहि → रहि → रहय → रहयति/ते
बल → बल् + इ → बालि → बलि → बलय → बलयति/ते
चिञ् → चि + इ → **अचो ञ्णिति** → चै + इ → चायि → चयि → चयय → चययति/ते

५. <u>पदव्यवस्था</u>

सामान्यतया चुरादिगणे धातवः उभयपदिनः सन्ति **णिचश्च** (१.३.७४), **शेषात्कर्तरि परस्मैपदम्** (१.३.७८) इति सूत्रद्वयेन | परन्तु चुरादौ अपवादभूत–अन्तर्गणद्वयं वर्तते, यत्र धातवः आत्मनेपदिनः सन्ति |

<u>आकुस्मादात्मनेपदिनः</u> (आकुस्मीयाः) = 39 नित्य–आत्मनेपदिनः धातवः

एषु प्रायः न कोऽपि धातुः प्रसिद्धः लोके |

यु → यावयते (निन्दां करोति)
चित् → चेतयते (चिन्तनं करोति)
गन्ध् → गन्धयते (दुःखं प्रापयति, मारयति)
कुस्म् → कुस्मयते (अयोग्यरूपेण, कुत्सितरूपेण हसति)

आगर्वादात्मनेपदिनः = 10 अदन्तवर्गीयाः नित्य–आत्मनेपदिनः धातवः

इमे धातवः अदन्ताः, नाम तस्मिन् समूहे सन्ति यस्मिन् धातोः अन्ते अननुनासिकः अत्, **अतो लोपः** (६.४.४८) इत्यनेन अतः लोपः, **अचः परस्मिन् पूर्वविधौ** (१.१.५७) इति परिभाषया पूर्वविधिः न भवति, यस्मात् **अत उपधायाः** (७.२.११६), **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनयोः अवकाशो न भवति |

पद गतौ → पद् → पदयते
कुह विस्मापने → कुह् → कुहयते
मृग अन्वेषणे → मृग् → मृगयते
गृह ग्रहणे → गृह् → गृहयते
वीर विक्रान्तौ → वीर् → वीरयते
शूर विक्रान्तौ → शूर् → शूरयते
स्थूल परिबृंहणे → स्थूल् → स्थूलयते
सत्र सन्तान–क्रियायाम् → सत् → सत्रयते
अर्थ याचने → अर्थ् → अर्थयते
गर्व माने → गर्व् → गर्वयते

द्वयोः गणयोः अपि धातवः नित्य–आत्मनेपदिनः | भेदः अयं यत् आकुस्मादात्मनेपदिधातुषु यत्र यत्र उपधायां लघु इक् वा लघु अकारः (अत्) अस्ति, तत्र तत्र यथासामान्यं गुणः वृद्धिः वा भवति एव | किन्तु आगर्वादात्मनेपदिनः यतः अदन्तधातवः, अतः तत्र उपधायां लघु इक् वा लघु अकारः (अत्) अस्ति चेदपि **अचः परस्मिन् पूर्वविधौ** (१.१.५७) इत्यनेन गुणः वृद्धिः च न भवतः |

ये धातवः आकुस्मादात्मनेपदिनः अपि आगर्वादात्मनेपदिनः अपि न सन्ति, ते सर्वे **णिचश्च** इति सूत्रेण उभयपदिनः एव, यथा चोरयति / चोरयते इत्यादीनि रूपाणि |

६. वैकल्पिकाः णिजन्तधातवः (149 धातवः)

इमे धातवः वैकल्पिकाः णिजन्तधातवः |

अतः
- धातुः + णिच् + शप् (चुरादिगणे)

वा
- धातुः + केवलं शप् (भ्वादिगणे इव)

यथा—
युज् + णिच् + शप् → योजय → योजयति/योजयते

वा

युज् + शप् → योज → योजति

यदा कदापि कर्तरि सार्वधातुके परे विशिष्ट-विकरणप्रत्ययः नोक्तः, तदा शप् इति विकरणप्रत्ययः भवति एव | शप् तु सामान्यम् | एते वैकल्पिकाः णिजन्तधातवः पाणिनिना भ्वादिगणस्य धातुपाठे नोक्ताः, किञ्च मातृभिः उच्यते यत् भ्वादिगणे भवन्तु यतोहि एषां कृते किमपि विशिष्टविधायकसूत्रं नापेक्षितम् | यथा भ्वादिगणे **कर्तरि शप्** (३.१.६८) इत्यनेन शप् विहितः, तथैव अत्रापि— न कोऽपि भेदः | अपरेषु स्थलेषु अस्माभिः दृष्टं यत् कश्चन धातुः कस्मिंश्चित् धातुगणे नास्ति चेदपि, तस्य गणस्य विकरणप्रत्ययः विधीयते विशिष्टसूत्रेण | अत्र तथा किमपि नास्ति; भ्वादिवत् **कर्तरि शप्** (३.१.६८) इत्यनेन कार्यं सिध्यति— अतः इमे भ्वादिगणीयाः भवन्तु इति मातृणां मतम् |

**कर्तरि शप्** (३.१.६८) = धातुतः शप्-प्रत्ययः भवति, कर्त्रर्थक-सार्वधातुकप्रत्यये परे | कर्तरि सप्तम्यन्तं, शप् प्रथमान्तं, द्विपदमिदं सूत्रम् | **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः | **धातोरेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **धातोः शप् प्रत्ययः परश्च कर्तरि सार्वधातुके** |

इमे वैकल्पिकाः णिजन्तधातवः पञ्चसु विभागेषु विभक्ताः सन्ति—आकुस्मीयाः; आस्वदीयाः; आधृषीयाः युजादयः च; णिजन्ताश्चुरादयः; इदितः उदितः च | एते अन्तर्गणाः सन्ति; एकैकस्य लक्षणं भिन्नम् | यथा आस्वदीय-अन्तर्गणे यत्र धातुः सकर्मकः, तत्र णिच् भवति; यत्र धातुः अकर्मकः, तत्र णिच् न भवति | चुरादिगणे धातुः उदित् चेत्, इत्-संज्ञक-उकारस्य अन्यत् फलं नास्ति चेत्, णिच्-वैकल्पिकम् इति सूचयति | एषु पञ्चसु सर्वत्र णिजभावे धातुः परस्मैपदी एव भवति |

आकुस्मीयाः धातवः (आकुस्मादात्मनेपदिनः) द्विविधाः— केचन नित्यणिजन्ताः, अन्ये 'वा णिजन्ताः' अपि | ये 'वा णिजन्ताः' सन्ति, ते णिच्-अभावे **शेषात् कर्तरि परस्मैपदम्** इत्यनेन परस्मैपदिनः एव |

परिसमाप्तिः

चत्वारः धातुगणाः सन्ति यत्र अङ्गम् अदन्तं भवति; ते भ्वादिगणः, दिवादिगणः, तुदादिगणः, चुरादिगणः च | एषां गणानां कृते अधुना सार्वधातुकलकाराणां पाठः परिसमाप्तः | आहत्य एषु चतुर्षु गणेषु १७०४ धातवः सन्ति | धातुः सामान्यो वा विशेषो वा, एषां सर्वेषां धातूनां कृते लट्, लोट्, लङ्, विधिलिङ् च तिङन्तरूपाणि अस्माभिः ज्ञातानि | पाणिनीयधातुपाठे आहत्य १९४३ धातवः सन्ति | अतः एतावता १९४३ इत्येषु १७०४ इत्येषां सार्वधातुकलकार-रूपाणि अस्माभिः अवलोकितानि | किञ्चित् पुनस्स्मरणं क्रियते चेत्, ज्ञास्यते यत् बहु किमपि व्यावहारिकं ज्ञानं सम्पादितम् | अवशिष्टाः केवलं २३९ धातवः सन्ति येषाम् अङ्गम् अदन्तं नास्ति; सम्प्रति तेषां सार्वधातुकलकार-रूपाणि परिशीलयिष्यामः |

Swarup – May 2013 (Updated September 2015)